Name : ..............................................................................................................

Roll No. : ...............................................

कुल प्रश्नों की संख्या : **27** ]

[ कुल मुद्रित पृष्ठों की संख्या : **12**

# T-222030–A

## विषय : संस्कृत ( सामान्य )

समय : **3 घण्टे** ]

[ पूर्णांक : **80**

***निर्देशाः*** : (*i*) **सर्वे**ः प्रश्नाः समाधेयाः।

(*ii*) सुन्दरं सुस्पष्टञ्च लिखत।

(*iii*) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखितव्यानि।

**प्रश्न–1** 'विद्यास्थानानि' अयं पाठः कस्मात् ग्रन्थात् गृहीतः? [1]

**प्रश्न–2** मदालसायाः सखी का आसीत्? [1]

**प्रश्न–3** 'उत्तररामचरितम्' नाटकस्य रचयिता कः? [1]

**प्रश्न–4** शूद्रकेन रचितं प्रकरणस्य नाम किम् अस्ति? [1]

**प्रश्न–5** 'गीतिकाव्यस्य' अन्य नाम किम् अस्ति? [1]

M-44

**प्रश्न–6** ''केवलं महाराजशिववीरस्याज्ञां वयं शिरसा <u>वहामः</u>'' इति वाक्ये रेखाङ्कितपदस्य प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत— [1]

(*i*) पालयामः (*ii*) तिरस्कुर्मः (*iii*) अवमानयामः।

**प्रश्न-7** 'ततश्च' पदे का सन्धिः वर्तते? [1]

**प्रश्न-8** 'योगेन + अन्ते' इत्यस्य सन्धिं कृत्वा लिखत। [1]

**प्रश्न-9** 'त्रिलोकम्' इति पदे कः समासः अस्ति? [1]

**प्रश्न-10** 'परित्यज्य' इत्ययस्य पदस्य प्रत्ययं पृथक् कुरुत। [1]

**प्रश्न-11** अधोलिखितयोः वाक्यद्वयोः रेखाङ्कितपदयोः सन्धिविच्छेदं कृत्वा लिखत— [1+1=2]

(*i*) हरिश्चन्द्रः इव विक्रीतवन्तः।

(*ii*) दिलीपः इव राजेन्दुः क्षीरनिधाविव।

**प्रश्न-12** अधोलिखितयोः वाक्यद्वयोः कोष्ठकान्तर्गतपदान् सन्धिं कृत्वा लिखत— [1+1=2]

(*i*) (सिद्धः + अहम्) बलवान् सुखी अस्मि।

(*ii*) (तत् + गुणैः) कर्णमागत्य चापलाय प्रचोदितः।

**प्रश्न-13** बल्लालसेनस्य द्वयोः रचनयोः नाम्नी लिखत। [1+1=2]

**प्रश्न-14** पद्यकाव्यस्य परिभाषा स्वभाषया लिखत। [2]

**प्रश्न-15** नाटकस्य काः अपि तिस्त्रः विशेषताः स्वभाषया लिखत। [1+1+1=3]

**प्रश्न-16** अधोलिखितेषु वाक्येषु कोष्ठकात् उचित विभक्तिपदं चित्वा रिक्तस्थानानि पूरयत— [1+1+1=3]

(*i*) दैवी संपत् ........... मता। (विमोक्षं / विमोक्षाय)

(*ii*) हा धिक्! .......... अविज्ञायोपालभसे। (अस्मान् / अस्मासु)

(*iii*) .......... असौ शत्रुः हतः। (अहम् / मया)

**प्रश्न-17** अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत— [1×4=4]

गुणी गुणं वेत्ति न वेत्ति निर्गुण:,

बली बलं वेत्ति न वेत्ति निर्बल: ।

पिको बसन्तस्य गुणं न वायस:,

करी च सिंहस्य बलं न मूषक: ॥

*प्रश्ना:*

(*i*) कस्य गुणं पिक: जानाति ?

(*ii*) करी कस्य बलं जानाति ?

(*iii*) 'काक:' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(*iv*) 'निर्बल:' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

***अथवा***

त्रिविधं नरकस्येदं द्वारं नाशनमात्मन: ।

काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

*प्रश्ना:*

(*i*) नरकस्य द्वारं कतिविधम् ?

(*ii*) एतत्त्रयं किं त्यजेत् ?

(*iii*) 'कोप:' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(*iv*) श्लोकात् एकम् अव्ययपदं चित्वा लिखत।

**प्रश्न-18** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत— [1×4=4]

कुण्डला— सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

मदालसा— ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

कुण्डला— विनयशीले! विद्या ददाति विनयम् अतएव एवं भणसि। कुलगुरुतुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

मदालसा— किं श्रुतं त्वया यद् गुरुवर्यैः माम् अधिकृत्य पित्रे कथितम्?

कुण्डला— अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वरः न प्राप्तः। अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

*प्रश्नाः*

(*i*) अन्वेषणं कार्यम् इति केषां मतम् आसीत्?

(*ii*) राजकुमारी मदालसा कीदृशी जाता?

(*iii*) 'विद्या' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम्?

(*iv*) 'अविनयम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?

***अथवा***

संन्यासी— तत् किं कोऽपि न प्रविशति रात्रौ?

दौवारिकः— (साक्षेपम्) कोऽपि कथं न प्रविशति? परिचिता वा, प्राप्तपरिचयपत्रा वा, आहूता वा प्रविशन्ति, न तु ये केऽपि समागता भवादृशाः।

संन्यासी— दौवारिक! इत आयाहि किमपि कर्णे कथयिष्यामि?

दौवारिकः— (तथा कृत्वा) कथ्यताम्।

संन्यासी— यदि त्वं मां प्रविशन्तं न प्रतिरून्धेः तदधुनैव परिष्कृतपारदभस्म तुभ्यं दद्याम् यथा त्वं गुञ्जामात्रेण अपि द्वापञ्चाशत्संख्याकतुलापरिमितं ताम्रं सुवर्णं विधातुं शक्नुयाः।

*प्रश्नाः*

(*i*) कोऽपि कदा न प्रविशति?

(*ii*) त्वं गुञ्जामात्रेणापि किं कर्तुं शक्नुयाः?

(*iii*) 'परिष्कृत पारदभस्म' अनयोः पदयोः विशेष्यपदं किम्?

(*iv*) 'इदानीमेव' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

**प्रश्न-19** भवत्याः नाम भावना। भवत्याः सखी मन्दाकिनी संस्कृतं पठितुं भवत्याः परामर्शं वाञ्छति। तां प्रेरयितुं लिखिते पत्रे मञ्जूषायाः सहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत— [½×10=5]

भिलाईनगरम्

प्रिये ---(*i*)---

नमस्ते!

भवत्याः पत्रं प्राप्तम्। भवती ---(*ii*)--- पठितुम् इच्छति, ---(*iii*)--- ज्ञात्वा मे प्रसन्नतायाः सीमा नास्ति। एषा भाषा सर्वाधिका ---(*iv*)---। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा। वेदाः, उपनिषदः, रामायणं, महाभारतं, ---(*v*)--- , महाकाव्यानि, कथासाहित्यम्, इत्यादिकं सर्वं ---(*vi*)--- अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणापदं च अस्ति। ---(*vii*)--- संस्कृतं पृथक् कर्तुं तथैव न शक्यते यथा पुष्पेभ्यः सुगन्धम्। संस्कृतेन सम्भाषणम् अस्माकं ---(*viii*)---गौरवं वर्धयति, हीनभावना च नाशयति। अतः त्वम् अवश्यं संस्कृतं पठ, पठित्वा च ---(*ix*)--- कुरु। एवं वयं भारतमातुः सेवां कृत्वा धन्याः भवाम।

सर्वेभ्यः अग्रजेभ्यः मम प्रणामाः अनुजेभ्यः च आशीर्वादः।

भवत्याः ---(*x*)---

भावना

मञ्जूषा

| |
|---|
| वैज्ञानिकी, प्रचारं, वाङ्मयम्, प्रिय सखी, इति, भारतीय संस्कृतेः, पुराणानि, संस्कृतं, मन्दाकिने, हृदयेषु |

***अथवा***

रुग्णतायाः कारणात् अवकाशप्राप्तये प्राचार्यं प्रति लिखिते प्रार्थनापत्रे प्रदत्तशब्दैः रिक्तस्थानानि पूरयत—

(i) ------

श्रीमन्तः प्राचार्यः

शा. उ. मा. वि. देवग्रामम्

विषय— (ii) ------ प्रार्थना पत्रम्।

मान्याः

सविनयं (iii) ------ अस्ति यद् विगतरात्रिप्रभृति अहं (iv) ------ पीड़ितोऽस्मि, अतः विद्यालयम् (v) ------ असमर्थोऽस्मि। कृपया 02.03.2022 दिनाङ्कात् 03.03.2022 दिनाङ्कपर्यन्तम् इति (vi) ------ दिवसयोः कृते (vii) ------ प्रदाय माम् (viii) ------ भवन्तः।

(ix) ------

भवत्याः (x) ------ शिष्याः

वर्षा

कक्षा–द्वादश

मञ्जूषा

| |
|---|
| अवकाशप्राप्तये, सेवायाम्, आज्ञाकारिणी, निवेदनम्, आगन्तुम्, तीव्रज्वरेण, अवकाशं, द्वयोः, अनुगृह्णन्तु, सधन्यवादम् |

**प्रश्न-20** अधः प्रदत्तायां लघुकथायां मञ्जूषापद सहायतया रिक्तस्थानानि पूरयत— [½×10=5]

सर्वेभ्यः जलं ------ (i) अहम्। अतः जनाः मां 'मेघं', ------ (ii), 'वारिदः', 'पयोदः', इति ------ (iii) अपि जानन्ति। सागरः मम ------ (iv), गगनं मम गृहं, धरा मम गन्तव्यम् अस्ति। ------ (v) मां प्रकाशयति, पवनः स्वाङ्के ------ (vi)। बालाः मां दृष्ट्वा हृष्यन्ति, जनाः ------ (vii), कृषकाः मोदन्ते ------ (viii) च नृत्यन्ति। तापेन व्याकुलधरायाः ------ (ix) मया एव शाम्यते। अहम् एव सर्वप्राणिनां ------ (x) अस्मि।

मञ्जूषा

| |
|---|
| प्रसीदन्ति, नामभिः, लालयति, जीवनम्, 'जलदः', पिपासा, ददामि, विद्युत्, मयूराः, जन्मस्थानम् |

***अथवा***

एकदा एकः राजा धनपूर्णं ------ (i) सेवकाय दत्वा अवदत्—गच्छ, एतद् धनं साधुषु ------ (ii) आगच्छ। सेवकः सर्वत्र अभ्रमत्, बहून् साधून् मिलित्वा धनं दातुं प्रयत्नम् अकरोत् परन्तु कोऽपि साधुः तस्मिन् रुचिं न ------ (iii)। सेवकं ------ (iv) अन्ये जनाः एकत्रिताः अभवन्। ते सर्वे सेवकं धनं दातुं ------ (v)। सेवकः अवदत्—एतद् धनं साधुषु एव वितरितुम् इच्छति ------ (vi) राजा। यदि केभ्यश्चित् अन्येभ्यः ददामि तर्हि राजा ------ (vii) भविष्यति इति। ------ (viii) सः स्यूतं राज्ञः समीपे आनयत् अवदत् च—राजन्! ये साधवः ते धनं नेच्छन्ति, ये धनम् इच्छन्ति ते ------ (ix) न सन्ति। इदानीं कः आदेशः ? राजा तेन धनेन साधुभ्यः ------ (x) व्यवस्थाम् अकारयत्।

मञ्जूषा

| |
|---|
| वितीर्य, परितः, अस्माकम्, आश्रमाणां, स्यूतं, प्रदर्शितवान्, प्रार्थितवन्तः, अन्ततः, क्रुद्धः, साधवः |

**प्रश्न-21** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समास-विग्रहं कुरुत (केषाञ्चित् चतुर्णाम्)— [1×4=4]

(*i*) कथं संन्यासिनोऽपि कठोरभाषणैः तिरस्करोषि?

(*ii*) यद्यपि देवादेशः प्रमाणम्।

(*iii*) तस्या येन अकार्यं करिष्यति।

(*iv*) तदनु स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्यावः।

(*v*) परस्परमनुव्रतौ त्रिवर्गं साधयतः।

(*vi*) लक्ष्मणः धैर्यसागरः आसीत्।

**प्रश्न-22** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रदत्त प्रश्नान् संस्कृतेन उत्तरत— [1×10=10]

संस्कृतसाहित्ये भारतवर्षस्य गौरवं स्थाने स्थाने वर्णितम्। एषा तु कर्मभूमिः। देवाः अपि अस्य गीतानि गायन्ति। भारतीयसंस्कृतेः आधारभूतं गुणद्वयम् अस्ति, त्यागः सेवा च। वयं संग्रहे विश्वासं न कुर्मः। अस्माकं श्रद्धा सु त्यागे एव। सर्वेषु मनुष्येषु एकः एव आत्मा। विविधाजातिषु विभक्ताः जनाः भारते निवसन्ति। यदि सर्वे स्वार्थभावनायाः त्यागं कुर्युः, सेवाभावनां स्वीकुर्युः, तदा अस्माकं देशः पुनः स्वप्राचीनं गौरवपदं प्राप्नुयात्। देशे ऐक्यभावं वर्धयितुं श्रीशङ्कराचार्यः देशस्य चतुर्षु कोणेषु चत्वारि मठानि स्थापितवान्। एतानि मठानि भारते सांस्कृतिकचेतनायाः प्रसारम् अकुर्वन्। नूनम् आध्यात्मिकता एव अस्य अमूल्या सम्पत्तिः। यदि एषा सम्पत्तिः विनश्यति तर्हि मानवतायाः एव विनाशः भविष्यति।

*प्रश्नाः*

(*i*) श्रीशङ्कराचार्यः कति मठानि स्थापितवान्?

(*ii*) का खलु अस्य देशस्य अमूल्या सम्पत्तिः?

(*iii*) अस्माकं श्रद्धा कस्मिन् गुणे वर्तते?

(*iv*) वयं कस्मिन् विश्वासं न कुर्मः?

(*v*) भारतीय संस्कृतेः आधारभूतं गुणद्वयं किम्?

(*vi*) अस्माकं देशवासिनः कस्याः भावनायाः त्यागं कुर्युः?

(*vii*) "देवाः अपि अस्य गीतानि गायन्ति" इति वाक्ये 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(*viii*) 'निवसन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(*ix*) 'सर्वेषु मनुष्येषु' अनयोः पदयोः विशेषणपदं किम्?

(*x*) गद्यांशस्य समुचितं शीर्षकं लिखत।

***अथवा***

सूर्य: प्रात:काले पूर्वस्यां दिशायाम् उदेति। प्रात:काले सूर्यस्य प्रकाश: अन्धकारम् अपनयति। तदा प्रकृते: शोभा अतीव रमणीया भवति। शीतल: मन्द: सुगन्ध: च समीर: चलति। खगा: वृक्षेषु मधुरं कूजन्ति। उपवनेषु पुष्पाणि सरोवरेषु च कमलानि विकसन्ति। विकसितानां पुष्पाणामुपरि स्थित्वा भ्रमरा: मधुरं गुञ्जन्ति। आश्रमेषु मुनय: स्नानं कृत्वा सूर्यं नमन्ति ईश्वरं च भजन्ति। ग्रामेषु कृषका: प्रातराशं कृत्वा हलसहितान् बलीवरदान् नीत्वा क्षेत्राणि प्रति गच्छन्ति। जना: उपवनेषु भ्रमणं कुर्वन्ति। छात्रा: विद्यालयं गच्छन्ति। ते तत्र पाठान् पठन्ति लेखान् च लिखन्ति।

अस्माकं जीवने सूर्यस्य अत्यधिकं महत्त्वमस्ति। अस्यैव प्रकाशे जगत: सर्व: व्यवहार: प्रचलति। अस्य दिनपति–रवि–दिनमणि–आदित्य–भास्कर–दिनेश–इत्यादीनि अनेकानि अभिधानानि सन्ति। गायत्रीमन्त्र: अस्यैव स्तुतिं करोति।

*प्रश्ना:*

(*i*) सूर्य: कस्यां दिशायाम् उदेति ?

(*ii*) के वृक्षेषु मधुरं कूजन्ति ?

(*iii*) कृषका: प्रातराशं कृत्वा कानि प्रति गच्छन्ति ?

(*iv*) केषां जीवने सूर्यस्य महत्त्वमस्ति ?

(*v*) कस्य प्रकाश: किम् अपनयति ?

(*vi*) सूर्यस्य कानि अभिधानानि सन्ति ?

(*vii*) 'पूर्वस्यां दिशायाम्' अनयो: पदयो: विशेषणपदं किम् ?

(*viii*) 'पवन:' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(*ix*) 'लिखन्ति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(*x*) 'चन्द्रस्य' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**प्रश्न-23** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत— [1×4=4]

राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः-शनैः प्राह-तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः।

*प्रश्नाः*

(*i*) वत्सराजः कं नत्वा शनैः-शनैः प्राह?

(*ii*) कः सभां समागतः?

(*iii*) 'नृपस्य' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(*iv*) गद्यांशात् एकम् अव्ययपदं चित्वा लिखत।

***अथवा***

तत्र वर्णानां स्थान-करण-प्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा। नानाशनाधीतानां मन्त्राणां विनियोजकं सूत्रं कल्पः। सा च यजुर्विद्या। शब्दानामन्वाख्यानं व्याकरणम्, निर्वचनं निरुक्तम्। छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम्। पौरुषेयं तु पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रम् इति चत्वारि शास्त्राणि।

*प्रश्नाः*

(*i*) केषां विनियोजकं सूत्रं कल्पः?

(*ii*) व्याकरणं किं वर्णितम्?

(*iii*) 'अक्षराणाम्' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(*iv*) 'निर्वचनं निरुक्तम्' अनयोः पदयोः विशेषणपदं किम्?

**प्रश्न-24** अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति-प्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत (केषाञ्चित् पञ्चानाम्)— [1×5=5]

(*i*) मातुः परिवादं न —— ( श्रु+तुमुन्) इच्छामि।

(*ii*) परम् एकः उपायः अपि —— (चिन्त्+क्त) मया।

(*iii*) नैकेनापि समं गता ——— (वसुमत्+ङीप्) नूनं त्वया यास्यति।

(*iv*) भर्ता सदैव भार्या भर्तव्या ——— (रक्ष्+तव्यत्+टाप्) च।

(*v*) तदन्वये शुद्धिमतिः ——— (प्र+सू+क्त) शुद्धिमत्तरः।

(*vi*) वैवस्वतो मनुर्नाम ——— (मान्+अनीयर्) मनीषिणाम्।

(v*ii*) भुशुण्डीं स्कन्धे निधाय निपुणं ——— (निः+ईक्ष्+शानच्)।

(v*iii*) भोजराजेन ——— (भुज्+तव्यत्) सगौड़ो दक्षिणापथः।

**प्रश्न–25** अधोलिखितानां वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत (केषाञ्चित् पञ्चानाम्)— [1×5=5]

(*i*) ग्राम के दोनों ओर वृक्ष हैं।

(*ii*) कोलाहल मत करो।

(*iii*) राजा याचक को दान देता है।

(*iv*) बालक सर्प से डरता है।

(*v*) गङ्गा हिमालय से निकलती है।

(*vi*) हमारे शरीर में अनेक अङ्ग हैं।

(*vii*) पुत्र पिता के साथ बाजार जाता है।

(*viii*) श्री गणेश को नमस्कार।

**प्रश्न–26** अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये मञ्जूषाप्रदत्त पदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयं च पुनः लिखत— [½×10=5]

(*अ*) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

अन्वयः- ज्ञाने ------ (*i*) शक्तौ ------ (*ii*) त्यागे ------ (*iii*) गुणानुबन्धित्वात् ------ (*iv*) सप्रसवाः इव ------ (*v*) सन्ति।

(ब) द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥

अन्वयः- द्वेष्यः अपि ------ (i) शिष्टः तस्य ------ (ii) औषधं यथा ------ (iii)

प्रियः अपि आसीत् ------ (iv) अङ्गुलि इव ------ (v) ।

मञ्जूषा

| |
|---|
| संमतः, आर्तस्य, दुष्टः, उरगक्षता, त्याज्यः, मौनं, क्षमा, श्लाघाविपर्यय, तस्य, गुणाः |

***अथवा***

स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत यो अस्मिन् प्रश्नपत्रे न समागताः।

**प्रश्न-27** अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिख्यताम् (केषाञ्चित् पञ्चानाम्)— [1×5=5]

(*i*) एकशरीरसंक्षिप्ता का रक्षितव्या?

(*ii*) महीक्षिताम् आद्यः कः आसीत्?

(*iii*) कः तुरीयाश्रमसेवी अस्ति?

(*iv*) कः कण्टकजालं पश्यति?

(*v*) भोजः कस्य पुत्रः आसीत्?

(*vi*) कस्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः अस्ति?

(*vii*) अपौरुषेयं किम् अस्ति?

(v*iii*) जगतः क्षयाय के प्रभवन्ति?

———